# Shata Shloki or Vedanta Kesari

# શતશ્લોકી અથવા વેદાન્તકેસરી

## Document Information

Text title : shatashloki

File name : shatashloki.itx

Category : major_works, shankarAchArya

Location : doc_z_misc_major_works

Author : Shankaracharya

Transliterated by : Subhash Prajapati, Sunder Hattangadi

Proofread by : Subhash Prajapati, Sreenivasa Rao Bhagavatula, Sunder Hattangadi

Latest update : December 19, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Shata Shloki or Vedanta Kesari

# શતશ્લોકી અથવા વેદાન્તકેસરી

॥ શ્રીઃ ॥

॥ અથ શતશ્લોકી ॥

દૃષ્ટાન્તો નૈવ દૃષ્ટસ્ત્રિભુવનજઠરે સદ્ગુરોર્જ્ઞાનદાતુઃ
સ્પર્શશ્ચેત્તત્ર કલ્પ્યઃ સ નયતિ યદહો સ્વર્ણતામશ્મસારમ્ ।
ન સ્પર્શત્વં તથાપિ શ્રિતચરણયુગે સદ્ગુરુઃ સ્વીયશિષ્યે
સ્વીયં સામ્યં વિધત્તે ભવતિ નિરુપમસ્તેન વાઽલૌકિકોઽપિ ॥ ૧॥ (ચાલૌકિકોઽપિ)

યદ્વચ્છ્રીખણ્ડવૃક્ષપ્રસૃતપરિમલેનાભિતોઽન્યેઽપિ વૃક્ષાઃ
શશ્વત્સૌગન્ધ્યભાજોઽપ્યતનુતનુભૃતાં તાપમુન્મૂલયન્તિ ।
આચાર્યાલ્લબ્ધબોધા અપિ વિધિવશતઃ સંનિધૌ સંસ્થિતાનાં
ત્રેધા તાપં ચ પાપં સકરુણહૃદયાઃ સ્વોક્તિભિઃ ક્ષાલયન્તિ ॥ ૨॥

આત્માનાત્મપ્રતીતિઃ પ્રથમમભિહિતા સત્યમિથ્યાત્વયોગા-
દ્વેધા બ્રહ્મપ્રતીતિર્નિગમનિગદિતા સ્વાનુભૂત્યોપપત્ત્યા ।
આદ્યા દેહાનુબન્ધાદ્ભવતિ તદપરા સા ચ સર્વાત્મકત્વા-
દાદૌ બ્રહ્માહમસ્મીત્યનુભવ ઉદિતે ખલ્વિદં બ્રહ્મ પશ્ચાત્ ॥ ૩॥

આત્મા ચિદ્વિત્સુખાત્માનુભવપરિચિતઃ સર્વદેહાદિયન્તા
સત્યેવં મૂઢબુદ્ધિર્ભજતિ નનુ જનોઽનિત્યદેહાત્મબુદ્ધિમ્ ।
બાહ્યોઽસ્થિસ્નાયુમજ્જાપલરુધિરવસાચર્મમેદોયુગન્ત-
ર્વિણ્મૂત્રશ્લેષ્મપૂર્ણં સ્વપરવપુરહો સંવિદિત્વાપિ ભૂયઃ ॥ ૪॥

દેહસ્ત્રીપુત્રમિત્રાનુચરહયવૃષાસ્તોષહેતુર્મમેત્થં
સર્વે સ્વાયુર્નયન્તિ પ્રથિતમલમમી માંસમીમાંસયેહ ।
એતે જીવન્તિ યેન વ્યવહૃતિપટવો યેન સૌભાગ્યભાજ-
સ્તં પ્રાણાધીશમન્તર્ગતમમૃતમમું નૈવ મીમાંસયન્તિ ॥ ૫॥

કશ્ચિત્કીટઃ કથંચિત્પટુમતિરભિતઃ કણ્ટકાનાં કુટીરં

કુર્વંસ્તેનૈવ સાકં વ્યવહૃતિવિધયે ચેષ્ટતે યાવદાયુઃ ।
તદ્વજ્જીવોઽપિ નાનાચરિતસમુદિતૈઃ કર્મભિઃ સ્થૂલદેહં
નિર્માયાત્રૈવ તિષ્ઠન્નનુદિનમમુના સાકમભ્યેતિ ભૂમૌ ॥ ૬॥

સ્વીકુર્વન્વ્યાઘ્રવેષં સ્વજઠરભૃતયે ભીષયન્યશ્ચ મુગ્ધા-
ન્મત્વા વ્યાઘ્રોઽહમિત્થં સ નરપશુમુખાન્બાધતે કિં નુ સત્ત્વાન્ ।
મત્વા સ્ત્રીવેષધારી સ્ત્ર્યહમિતિ કુરુતે કિં નટો ભર્તુરિચ્છાં
તદ્વચ્છારીર આત્મા પૃથગનુભવતો દેહતો યત્સ સાક્ષી ॥ ૭॥ (યઃ સ)

સ્વં બાલં રોદમાનં ચિરતરસમયં શાન્તિમાનેતુમગ્રે
દ્રાક્ષં ખાર્જૂરમામ્રં સુકદલમથવા યોજયત્યમ્બિકાસ્ય ।
તદ્વચ્ચેતોઽતિમૂઢં બહુજનનભવાન્મૌઢ્યસંસ્કારયોગા-
દ્બોધોપાયૈરનેકૈરવશમુપનિષદ્બોધયામાસ સમ્યક્ ॥ ૮॥

યત્પ્રીત્યા પ્રીતિપાત્રં તનુયુવતિતનૂજાર્થમુખ્યં સ તસ્મા-
ત્પ્રેયાનાત્માથ શોકાસ્પદમિતરદતઃ પ્રેય એતત્કથં સ્યાત્ ।
ભાર્યાદ્યં જીવિતાર્થી વિતરતિ ચ વપુઃ સ્વાત્મનઃ શ્રેય ઇચ્છં-
સ્તસ્માદાત્માનમેવ પ્રિયમધિકમુપાસીત વિદ્વાન્ન ચાન્યત્ ॥ ૯॥

યસ્માદ્યાવત્પ્રિયં સ્યાદિહ હિ વિષયતસ્તાવદસ્મિન્પ્રિયત્વં
યાવદ્દુઃખં ચ યસ્માદ્ભવતિ ખલુ તતસ્તાવદેવાપ્રિયત્વમ્ ।
નૈકસ્મિન્સર્વકાલેઽસ્ત્યુભયમપિ કદાપ્યપ્રિયોઽપિ પ્રિયઃ સ્યા-
ત્પ્રેયાનપ્યપ્રિયો વા સતતમપિ તતઃ પ્રેય આત્માખ્યવસ્તુ ॥ ૧૦॥

શ્રેયઃ પ્રેયશ્ચ લોકે દ્વિવિધમભિહિતં કામ્યમાત્યન્તિકં ચ
કામ્યં દુઃખૈકબીજં ક્ષણલવવિરસં તચ્ચિકીર્ષન્તિ મન્દાઃ ।
બ્રહ્મૈવાત્યન્તિકં યન્નિરતિશયસુખસ્યાસ્પદં સંશ્રયન્તે
તત્ત્વજ્ઞાસ્તચ્ચ કાઠોપનિષદભિહિતં ષડ્વિધાયાં ચ વલ્લ્યામ્ ॥ ૧૧॥

આત્મામ્ભોધેસ્તરઙ્ગોઽસ્મ્યહમિતિ ગમને ભાવયન્નાસનસ્થઃ
સંવિત્સૂત્રાનુવિદ્ધો મણિરહમિતિ વાસ્મીન્દ્રિયાર્થપ્રતીતૌ ।
દૃષ્ટોઽસ્મ્યાત્માવલોકાદિતિ શયનવિધૌ મગ્ન આનન્દસિન્ધા-
વન્તર્નિષ્ઠો મુમુક્ષુઃ સ ખલુ તનુભૃતાં યો નયત્યેવમાયુઃ ॥ ૧૨॥

વૈરાજવ્યષ્ટિરૂપં જગદખિલમિદં નામરૂપાત્મકં સ્યા-
દન્તઃસ્થપ્રાણમુખ્યાત્પ્રચલતિ ચ પુનર્વેત્તિ સર્વાન્પદાર્થાન્ ।
નાયં કર્તા ન ભોક્તા સવિતૃવદિતિ યો જ્ઞાનવિજ્ઞાનપૂર્ણઃ

સાક્ષાદિત્થં વિજાનન્વ્યહરતિ પરાત્માનુસંધાનપૂર્વમ્ ॥ ૧૩॥

નૈર્વેદ્યં જ્ઞાનગર્ભં દ્વિવિધમભિહિતં તત્ર વૈરાગ્યમાદ્યં
પ્રાયો દુઃખાવલોકાદ્ભવતિ ગૃહસુહૃત્પુત્રવિત્તૈષણાદેઃ ।
અન્યજ્જ્ઞાનોપદેશાદ્યદુદિતવિષયે વાન્તવદ્ધેયતા સ્યા-
ત્પ્રવ્રજ્યાપિ દ્વિધા સ્યાન્નિયમિતમનસં દેહતો ગેહતશ્ચ ॥ ૧૪॥ (મનસો ગેહતો)

યઃ કશ્ચિત્સૌખ્યહેતોસ્ત્રિજગતિ યતતે નૈવ દુઃખસ્ય હેતો-
ર્દેહેઽહન્તા તદુત્થા સ્વવિષયમમતા ચેતિ દુઃખાસ્પદે દ્વે ।
જાનન્રોગાભિઘાતાદ્યનુભવતિ યતો નિત્યદેહાત્મબુદ્ધિ-
ર્ભાર્યાપુત્રાર્થનાશે વિપદમથ પરામેતિ નારાતિનાશે ॥ ૧૫॥

તિષ્ઠન્ગેહે ગૃહેશોઽપ્યતિથિરિવ નિજં ધામ ગન્તું ચિકીર્ષુ-
ર્દેહસ્થં દુઃખસૌખ્યં ન ભજતિ સહસા નિર્મમત્વાભિમાનઃ ।
આયાત્રાયાસ્યતીદં જલદપટલવદ્યાતૃ યાસ્યત્યવશ્યં
દેહાદ્યં સર્વમેવં પ્રવિદિતવિશયો યશ્ચ તિષ્ઠત્યયત્નઃ ॥ ૧૬॥

શક્ત્યા નિર્મોકતઃ સ્વાદ્બહિરહિરિવ યઃ પ્રવ્રજન્સ્વીયગેહા-
ચ્છાયાં માર્ગદ્રુમોત્થાં પથિક ઇવ મનાક્ સંશ્રયેદ્દેહસંસ્થામ્ ।
ક્ષુત્પર્યાપ્તં તરુભ્યઃ પતિતફલમયં પ્રાર્થયેદ્ભૈક્ષમન્નં
સ્વાત્મારામં પ્રવેષ્ટું સ ખલુ સુખમયં પ્રવ્રજેદ્દેહતોઽપિ ॥ ૧૭॥

કામો બુદ્ધાવુદેતિ પ્રથમમિહ મનસ્યુદ્દિશત્યર્થજાતં
તદ્ગૃહ્ણાતીન્દ્રિયાસ્યૈસ્તદનધિગમતઃ ક્રોધ આવિર્ભવેચ્ચ ।
પ્રાપ્તાવર્થસ્ય સંરક્ષણમતિરુદિતો લોભ એતત્ત્રયં સ્યા-
ત્સર્વેષાં પાતહેતુસ્તદિહ મતિમતા ત્યાજ્યમધ્યાત્મયોગાત્ ॥ ૧૮॥

દાનં બ્રહ્માર્પણં યત્ક્રિયત ઇહ નૃભિઃ સ્યાત્ક્ષમાક્રોધસંજ્ઞા
શ્રદ્ધાસ્તિક્યં ચ સત્યં સદિતિ પરમતઃ સેતુસંજ્ઞં ચતુષ્કમ્ ।
તત્સ્યાદ્બન્ધાય જન્તોરિતિ ચતુર ઇમાન્દાનપૂર્વૈશ્ચતુર્ભિ-
સ્તીર્ત્વા શ્રેયોઽમૃતં ચ શ્રયત ઇહ નરઃ સ્વર્ગતિં જ્યોતિરાપ્તિમ્ ॥ ૧૯॥

અન્નં દેવાતિથિભ્યોઽર્પિતમમૃતમિદં ચાન્યથા મોઘમન્નં
યશ્ચાત્માર્થં વિધત્તે તદિહ નિગદિતં મૃત્યુરૂપં હિ તસ્ય ।
લોકેઽસૌ કેવલાઘો ભવતિ તનુભૃતાં કેવલાદી ચ યઃ સ્યા-
ત્ત્યક્ત્વા પ્રાણાગ્નિહોત્રં વિધિવદનુદિનં યોઽશ્નુતે સોઽપિ મર્ત્યઃ ॥ ૨૦॥

લોકે ભોજઃ સ એવાર્પયતિ ગૃહગતાયાર્થિનેઽન્નં કૃશાય
યસ્તસ્મૈ પૂર્ણમન્નં ભવતિ મખવિધૌ જાયતેઽજાતશત્રુઃ ।
સખ્યે નાન્નાર્થિને યોઽર્પયતિ ન સ સખા સેવમાનાય નિત્યં
સંસક્તાયાન્નમસ્માદ્વિમુખ ઇવ પરાવૃત્તિમિચ્છેત્કદર્યાત્ ॥ ૨૧॥

સ્વાજ્ઞાનજ્ઞાનહેતૂ જગદુદયલયૌ સર્વસાધારણૌ સ્તો
જીવેષ્વાસ્વર્ણગર્ભં શ્રુતય ઇતિ જગુર્હૂયતે સ્વપ્રબોધે ।
વિશ્વં બ્રહ્મણ્યબોધે જગતિ પુનરિદં હૂયતે બ્રહ્મ યદ્વ-
ચ્છુક્તૌ રૌપ્યં ચ રૌપ્યેઽધિકરણમથવા હૂયતેઽન્યોન્યમોહાત્ ॥ ૨૨॥

તુચ્છત્વાન્નાસદાસીદ્ગગનકુસુમવદ્ભેદકં નો સદાસી-
ત્કિં ત્વાભ્યામન્યદાસીદ્વ્યવહૃતિગતિસન્નાસ લોકસ્તદાનીમ્ ।
કિં ત્વર્વાગેવ શુક્તૌ રજતવદપરો નો વિરાડ્ વ્યોમપૂર્વઃ
શર્મણ્યાત્મન્યથૈતત્કુહકસલિલવત્કિં ભવેદાવરીવઃ ॥ ૨૩॥

બન્ધો જન્માત્યયાત્મા યદિ ન પુનરભૂત્તર્હિ મોક્ષોઽપિ નાસી-
દ્યદ્વદ્રાત્રિર્દિનં વા ન ભવતિ તરણૌ કિં તુ દૃગ્દોષ એષઃ ।
અપ્રાણં શુદ્ધમેકં સમભવદથ તન્માયયા કર્તૃસંજ્ઞં
તસ્માદન્યચ્ચ નાસીત્પરિવૃતમજયા જીવભૂતં તદેવ ॥ ૨૪॥

પ્રાગાસીદ્ભાવરૂપં તમ ઇતિ તમસા ગૂઢમસ્માદતર્ક્યં
ક્ષીરાન્તર્યદ્વદમ્ભો જનિરિહ જગતો નામરૂપાત્મકસ્ય ।
કામાદ્ધાતુઃ સિસૃક્ષોરનુગતજગતઃ કર્મભિઃ સમ્પ્રવૃત્તા-
દ્રેતોરૂપૈર્મનોભિઃ પ્રથમમનુગતૈઃ સંતતૈઃ કાર્યમાણૈઃ ॥ ૨૫॥

ચત્વારોઽસ્યાઃ કપર્દા યુવતિરથ ભવેન્નૂતના નિત્યમેષા
માયા વા પેશલા સ્યાદઘટનઘટનાપાટવં યાતિ યસ્માત્ ।
સ્યાદારમ્ભે ઘૃતાસ્યા શ્રુતિભવવયુનાન્યેવમાચ્છાદયન્તી
તસ્યામેતૌ સુપર્ણાવિવ પરપુરુષૌ તિષ્ઠતોઽર્થપ્રતીત્યા ॥ ૨૬॥

એકસ્તત્રાસ્ત્યસઙ્ગસ્તદનુ તદપરોઽજ્ઞાનસિન્ધું પ્રવિષ્ટો
વિસ્મૃત્યાત્મસ્વરૂપં સ વિવિધજગદાકારમાભાસમૈક્ષત્ ।
બુદ્ધ્યાન્તર્યાવદૈક્ષદ્વિસૃજતિ તમજા સોઽપિ તામેવમેક-
સ્તાવદ્વિપ્રાસ્તમેકં કથમપિ બહુધા કલ્પયન્તિ સ્વવાગ્ભિઃ ॥ ૨૭॥

નાયાતિ પ્રત્યગાત્મા પ્રજનનસમયે નૈવ યાત્યન્તકાલે
યત્સોઽખણ્ડોઽસ્તિ લૈઙ્ગં મન ઇહ વિશતિ પ્રવ્રજત્યૂર્ધ્વમર્વાક્ ।

તત્કાર્શ્યં સ્થૂલતાં વા ન ભજતિ વપુષઃ કિંતુ સંસ્કારજાતે
તેજોમાત્રા ગૃહીત્વા વ્રજતિ પુનરિહાયાતિ તૈસ્તૈઃ સહૈવ ॥ ૨૮॥

આસીત્પૂર્વં સુબન્ધુર્ભૃશમવનિસુરો યઃ પુરોધાઃ સનાતે-
ર્બ્રાહ્મ્યાત્કૂટાભિચારાત્સ ખલુ મૃતિમિતસ્તન્મનોઽગાત્કૃતાન્તમ્ ।
તદ્ભ્રાતા શ્રૌતમન્ત્રૈઃ પુનરનયદિતિ પ્રાહ સૂક્તેન વેદ-
સ્તસ્માદાત્માભિયુક્તં વ્રજતિ નનુ મનઃ કર્હિચિન્નાન્તરાત્મા ॥ ૨૯॥

એકો નિષ્કમ્પ આત્મા પ્રચલતિ મનસા ધાવમાનેન તસ્મિં-
સ્તિષ્ઠન્નગ્રેઽથ પશ્ચાન્ન હિ તમનુગતં જાનતે ચક્ષુરાદ્યાઃ ।
યદ્વત્પાથસ્તરઙ્ગૈઃ પ્રચલતિ પરિતો ધાવમાનૈસ્તદન્તઃ
પ્રાક્પશ્ચાદસ્તિ તેષાં પવનસમુદિતૈસ્તૈઃ પ્રશાન્તૈર્યથાવત્ ॥ ૩૦॥

એકાક્યાસીત્સ પૂર્વં મૃગયતિ વિષયાનાનુપૂર્વ્યાન્તરાત્મા
જાયા મે સ્યાત્પ્રજા વા ધનમુપકરણં કર્મ કુર્વંસ્તદર્થમ્ ।
ક્લેશૈઃ પ્રાણાવશેષૈર્મહદપિ મનુતે નાન્યદસ્માદ્વરીય-
સ્ત્વેકાલાભેઽપ્યકૃત્સ્નો મૃત ઇવ વિરમત્યેકહાન્યાકૃતાર્થઃ ॥ ૩૧॥

નાસીત્પૂર્વં ન પશ્ચાદતનુદિનકરાચ્છાદકો વારિવાહો
દૃશ્યઃ કિં ત્વન્તરાસૌ સ્થગયતિ સ દૃશં પશ્યતો નાર્કબિમ્બમ્ ।
નો ચેદેવં વિનાર્કં જલધરપટલં ભાસતે તર્હિ કસ્મા-
ત્તદ્વદ્વિશ્વં પિધત્તે દૃશમથ ન પરં ભાસકં ચાલકં સ્વમ્ ॥ ૩૨॥

ભુઞ્જાનઃ સ્વપ્નરાજ્યં સસકલવિભવો જાગરં પ્રાપ્ય ભૂયો
રાજ્યભ્રષ્ટોઽહમિત્થં ન ભજતિ વિષમં તન્મૃષા મન્યમાનઃ ।
સ્વપ્ને કુર્વન્નગમ્યાગમનમુખમઘં તેન ન પ્રત્યવાયી
તદ્વજ્જાગ્રદ્દશાયાં વ્યવહૃતિમખિલાં સ્વપ્નવદ્વિસ્મરેચ્ચેત્ ॥ ૩૩॥

સ્વપ્નાવસ્થાનુભૂતં શુભમથ વિષમં તન્મૃષા જાગરે સ્યા-
જ્જાગ્રત્યાં સ્થૂલદેહવ્યવહૃતિવિષયં તન્મૃષા સ્વાપકાલે ।
ઇત્થં મિથ્યાત્વસિદ્ધાવનિશમુભયથા સજ્જતે તત્ર મૂઢઃ
સત્યે તદ્ભાસકેઽસ્મિન્નિહ હિ કુત ઇદં તન્ન વિદ્મો વયં હિ ॥ ૩૪॥

જીવન્તં જાગ્રતીહ સ્વજનમથ મૃતં સ્વપ્નકાલે નિરીક્ષ્ય
નિર્વેદં યાત્યકસ્માન્મૃતમમૃતમમું વીક્ષ્ય હર્ષં પ્રયાતિ ।
સ્મૃત્વાપ્યેતસ્ય જન્તોર્નિધનમસુયુતિં ભાષતે તેન સાકં
સત્યેવં ભાતિ ભૂયોઽલ્પકસમયવશાત્સત્યતા વા મૃષાત્વમ્ ॥ ૩૫॥

સ્વાપ્નસ્ત્રીસઙ્ગસૌખ્યાદપિ ભૃશમસતો યા ચ રેતશ્ચ્યુતિઃ સ્યા-
ત્સા દૃશ્યા તદ્વદેતત્સ્ફુરતિ જગદસત્કારણં સત્યકલ્પમ્ ।
સ્વપ્ને સત્યઃ પુમાન્સ્યાદ્યુવતિરિહ મૃષૈવાનયોઃ સંયુતિશ્ચ
પ્રાતઃ શુક્રેણ વસ્ત્રોપહતિરિતિ યતઃ કલ્પનામૂલમેતત્ ॥ ૩૬॥

પશ્યન્ત્યારામમસ્ય પ્રતિદિવસમમી જન્તવઃ સ્વાપકાલે
પશ્યત્યેનં ન કશ્ચિત્કરણગણમૃતે માયયા ક્રીડમાનમ્ ।
જાગ્રત્યર્થવ્રજાનામથ ચ તનુભૃતાં ભાસકં ચાલકં વા
નો જાનીતે સુષુપ્તૌ પરમસુખમયં કશ્ચિદાશ્ચર્યમેતત્ ॥ ૩૭॥

સ્વપ્ને મન્ત્રોપદેશઃ શ્રવણપરિચિતઃ સત્ય એષ પ્રબોધે
સ્વાપ્નાદેવ પ્રસાદાદભિલષિતફલં સત્યતાં પ્રાતરેતિ ।
સત્યપ્રાપ્તિસ્ત્વસત્યાદપિ ભવતિ તથા કિં ચ તત્સ્વપ્રકાશં
યેનેદં ભાતિ સર્વં ચરમચરમથોચ્ચાવચં દૃશ્યજાતમ્ ॥ ૩૮॥

મધ્યપ્રાણં સુષુપ્તૌ સ્વજનિમનુવિશન્ત્યગ્નિસૂર્યાદયોઽમી
વાગાદ્યાઃ પ્રાણવાયું તદિહ નિગદિતા ગ્લાનિરેષાં ન વાયોઃ ।
તેભ્યો દૃશ્યાવભાસો ભ્રમ ઇતિ વિદિતઃ શુક્તિકારૌપ્યકલ્પઃ
પ્રાણાયામવ્રતં તચ્છ્રુતિશિરસિ મતં સ્વાત્મલબ્ધૌ ન ચાન્યત્ ॥ ૩૯॥

નોઽકસ્માદાર્દ્રમેધઃ સ્પૃશતિ ચ દહનઃ કિં તુ શુષ્કં નિદાઘા-
દાર્દ્રં ચેતોઽનુબન્ધૈઃ કૃતસુકૃતમપિ સ્વોક્તકર્મપ્રજાર્થૈઃ ।
તદ્વજ્જ્ઞાનાગ્નિરેતત્સ્પૃશતિ ન સહસા કિં તુ વૈરાગ્યશુષ્કં
તસ્માચ્છુદ્ધો વિરાગઃ પ્રથમમભિહિતસ્તેન વિજ્ઞાનસિદ્ધિઃ ॥ ૪૦॥

યત્કિઞ્ચિન્નામરૂપાત્મકમિદમસદેવોદિતં ભાતિ ભૂમૌ
યેનાનેકપ્રકારૈર્વ્યવહરતિ જગદ્યેન તેનેશ્વરેણ ।
તદ્વત્પ્રચ્છાદનીયં નિભૃતરશનયા યદ્વદેષ દ્વિજિહ્વ-
સ્તેન ત્યક્તેન ભોજ્યં સુખમનતિશયં મા ગૃધોઽન્યદ્ધનાદ્યમ્ ॥ ૪૧॥

જીવન્મુક્તિર્મુમુક્ષોઃ પ્રથમમથ તતો મુક્તિરાત્યન્તિકી ચ
તેઽભ્યાસજ્ઞાનયોગાદ્ગુરુચરણકૃપાપાઙ્ગસઙ્ગેન લબ્ધાત્ ।
અભ્યાસોઽપિ દ્વિધા સ્યાદધિકરણવશાદ્દૈહિકો માનસશ્ચ
શારીરસ્ત્વાસનાદ્યો હ્યુપરતિરપરો જ્ઞાનયોગઃ પુરોક્તઃ ॥ ૪૨॥

સર્વાનુન્મૂલ્ય કામાન્હૃદિ કૃતનિલયાન્ક્ષિપ્તશઙ્કૂનિવોચ્ચૈ-

દીર્ઘદેહાભિમાનસ્ત્યજતિ ચપલતામાત્મદત્તાવધાનઃ ।
યાત્યૂર્ધ્વસ્થાનમુચ્ચૈઃ કૃતસુકૃતભરો નાડિકાભિર્વિચિત્રૈ
નીલશ્વેતારુણાભિઃ સ્રવદમૃતભરં ગૃહ્યમાણાત્મસૌખ્યઃ ॥ ૪૩ ॥

પ્રાપશ્યદ્વિશ્વમાત્મેત્યયમિહ પુરુષઃ શોકમોહાદ્યતીતઃ
શુક્રં બ્રહ્માધ્યગચ્છત્સ ખલુ સકલવિત્સર્વસિદ્ધ્યાસ્પદં હિ ।
વિસ્મૃત્ય સ્થૂલસૂક્ષ્મપ્રભૃતિવપુરસૌ સર્વસંકલ્પશૂન્યો
જીવન્મુક્તસ્તુરીયં પદમધિગતવાન્પુણ્યપાપૈર્વિહીનઃ ॥ ૪૪ ॥

યઃ સત્ત્વાકારવૃત્તૌ પ્રતિફલતિ યુવા દેહમાત્રાવૃતોઽપિ
તદ્ધર્મૈર્બાલ્યવાર્દ્ધ્યાદિભિરનુપહતઃ પ્રાણ આવિર્બભૂવ ।
શ્રેયાન્સાધ્યસ્તમેતં સુનિપુણમતયઃ સત્યસંકલ્પભાજો
હ્યભ્યાસાદ્દેવયન્તઃ પરિણતમનસા સાકમૂર્ધ્વં નયન્તિ ॥ ૪૫ ॥

પ્રાયોઽકામોઽસ્તકામો નિરતિશયસુખાયાત્મકામસ્તદાસૌ
તત્પ્રાપ્તાવાપ્તકામઃ સ્થિતચરમદશસ્તસ્ય દેહાવસાને ।
પ્રાણા નૈવોત્ક્રમન્તિ ક્રમવિરતિમિતાઃ સ્વસ્વહેતૌ તદાનીં
ક્વાયં જીવો વિલીનો લવણમિવ જલેઽખણ્ડ આત્મૈવ પશ્ચાત્ ॥ ૪૬ ॥

પિણ્ડીભૂતં યદન્તર્જલનિધિસલિલં યાતિ તત્સૈન્ધવાખ્યં
ભૂયઃ પ્રક્ષિપ્તમસ્મિન્વિલયમુપગતં નામરૂપે જહાતિ ।
પ્રાજ્ઞસ્તદ્વત્પરાત્મન્યથ ભજતિ લયં તસ્ય ચેતો હિમાંશૌ
વાગગ્નૌ ચક્ષુરર્કે પયસિ પુનરસૃગ્રેતસી દિક્ષુ કર્ણૌ ॥ ૪૭ ॥

ક્ષીરાન્તર્યદ્વદાજ્યં મધુરિમવિદિતં તત્પૃથગ્ભૂતમસ્મા-
દ્ભૂતેષુ બ્રહ્મ તદ્વદ્વ્યવહૃતિવિદિતં શ્રાન્તવિશ્રાન્તિબીજમ્ ।
યં લબ્ધ્વા લાભમન્યં તૃણમિવ મનુતે યત્ર નોદેતિ ભીતિઃ
સાન્દ્રાનન્દં યદન્તઃ સ્ફુરતિ તદમૃતં વિદ્ધ્યતો હ્યન્યદાર્તમ્ ॥ ૪૮ ॥

ઓતઃ પ્રોતશ્ચ તન્તુષ્વિહ વિતતપટશ્ચિત્રવર્ણેષુ ચિત્ર-
સ્તસ્મિઞ્જિજ્ઞાસ્યમાને નનુ ભવતિ પટઃ સૂત્રમાત્રાવશેષઃ ।
તદ્વદ્વિશ્વં વિચિત્રં નગનગરનરગ્રામપશ્વાદિરૂપં
પ્રોતં વૈરાજરૂપે સ વિયતિ તદપિ બ્રહ્મણિ પ્રોતમોતમ્ ॥ ૪૯ ॥

રૂપં રૂપં પ્રતીદં પ્રતિફલનવશાત્પ્રાતિરૂપ્યં પ્રપેદે
હ્યેકો દ્રષ્ટા દ્વિતીયો ભવતિ ચ સલિલે સર્વતોઽનન્તરૂપઃ ।
ઇન્દ્રો માયાભિરાસ્તે શ્રુતિરિતિ વદતિ વ્યાપકં બ્રહ્મ તસ્મા-

જ્જીવત્વં યાત્યકસ્માદતિવિમલતરે બિમ્બિતં બુદ્ધ્યુપાધૌ ॥ ૫૦॥

તજ્જ્ઞાઃ પશ્યન્તિ બુદ્ધ્યા પરમબલવતો માયયાક્તં પતઙ્ગં
બુદ્ધાવન્તઃસમુદ્રે પ્રતિફલિતમરીચ્યાસ્પદં વેધસસ્તમ્ ।
યાદૃગ્યાવાનુપાધિઃ પ્રતિફલતિ તથા બ્રહ્મ તસ્મિન્યથાસ્યં
પ્રાપ્તાદર્શાનુરૂપં પ્રતિફલતિ યથાવસ્થિતં સત્સદૈવ ॥ ૫૧॥

એકો ભાનુસ્તદસ્થઃ પ્રતિફલનવશાદ્યસ્ત્વનેકોદકાન્ત-
ર્નાનાત્વં યાત્યુપાધિસ્થિતિગતિસમતાં ચાપિ તદ્વત્પરાત્મા ।
ભૂતેષૂચ્ચાવચેષુ પ્રતિફલિત ઇવાભાતિ તાવત્સ્વભાવા-
વચ્છિન્નો યઃ પરં તુ સ્ફુટમનુપહતો ભાતિ તાવત્સ્વભાવૈઃ ॥ ૫૨॥

યદ્વત્પીયૂષરશ્મૌ દિનકરકિરણૈર્બિમ્બિતૈરેતિ સાન્દ્રં
નાશં નૈશં તમિસ્રં ગૃહગતમથવા મૂર્છિતૈઃ કાંસ્યપાત્રે ।
તદ્વદ્બુદ્ધૌ પરાત્મદ્યુતિભિરનુપદં બિમ્બિતાભિઃ સમન્તા-
દ્ભાસન્તે હીન્દ્રિયાસ્યપ્રસૃતિભિરનિશં રૂપમુખ્યાઃ પદાર્થાઃ ॥ ૫૩॥

પૂર્ણાત્માનાત્મભેદાત્ત્રિવિધમિહ પરં બુદ્ધ્યવચ્છિન્નમન્ય-
ત્તત્રૈવાભાસમાત્રં ગગનમિવ જલે ત્રિપ્રકારં વિભાતિ ।
અમ્ભોવચ્છિન્નમસ્મિન્પ્રતિફલિતમતઃ પાથસોન્તર્બહિશ્ચ
પૂર્ણાવચ્છિન્નયોગે વ્રજતિ લયમવિદ્યા સ્વકાર્યૈઃ સહૈવ ॥ ૫૪॥

દૃશ્યન્તે દારુનાર્યો યુગપદગણિતાઃ સ્તમ્ભસૂત્રપ્રયુક્તાઃ
સંગીતં દર્શયન્ત્યો વ્યવહૃતિમપરાં લોકસિદ્ધાં ચ સર્વામ્ ।
સર્વત્રાનુપ્રવિષ્ટાદભિનવવિભવાદ્યાવદર્થાનુબન્ધા-
ત્તદ્વત્સૂત્રાત્મસંજ્ઞાદ્વ્યવહરતિ જગદ્ભૂર્ભુવઃસ્વર્મહાન્તમ્ ॥ ૫૫॥

તત્સત્યં યત્ત્રિકાલેષ્વનુપહતમદઃ પ્રાણદિગ્વ્યોમમુખ્યં
યસ્મિન્વિશ્રાન્તમાસ્તે તદિહ નિગદિતં બ્રહ્મ સત્યસ્ય સત્યમ્ ।
નાસ્ત્યન્યત્કિંચ યદ્વત્પરમધિકમતો નામ સત્યસ્ય સત્યં
સચ્ચ ત્યચ્ચેતિ મૂર્તાદ્યુપહિતમવરં સત્યમસ્યાપિ સત્યમ્ ॥ ૫૬॥

યત્કિઞ્ચિદ્ભાત્યસત્યં વ્યવહૃતિવિષયે રૌપ્યસર્પામ્બુમુખ્યં
તદ્વૈ સત્યાશ્રયેણેત્યયમિહ નિયમઃ સાવધિર્લોકસિદ્ધઃ ।
તદ્વૈ સત્યસ્ય સત્યે જગદખિલમિદં બ્રહ્મણિ પ્રાવિરાસી-
ન્મિથ્યાભૂતં પ્રતીતં ભવતિ ખલુ યતસ્તચ્ચ સત્યં વદન્તિ ॥ ૫૭॥

યત્રાકાશાવકાશઃ કલયતિ ચ કલામાત્રતાં યત્ર કાલો
યત્રૈવાશાવસાનં બૃહદિહ હિ વિરાટ્ પૂર્વમર્વાગિવાસ્તે ।
સૂત્રં યત્રાવિરાસીન્મહદપિ મહતસ્તદ્ધિ પૂર્ણાચ્ચ પૂર્ણં
સમ્પૂર્ણાદર્ણવાદેરપિ ભવતિ યથા પૂર્ણમેકાર્ણવામ્ભઃ ॥ ૫૮॥

અન્તઃ સર્વૌષધીનાં પૃથગમિતરસૈર્ગન્ધવીર્યૈર્વિપાકૈ-
રેકં પાથોદપાથઃ પરિણમતિ યથા તદ્વદેવાન્તરાત્મા ।
નાનાભૂતસ્વભાવૈર્વહતિ વસુમતી યેન વિશ્વં પયોદો
વર્ષત્યુચ્ચૈર્હુતાશઃ પચતિ દહતિ વા યેન સર્વાન્તરોઽસૌ ॥ ૫૯॥

ભૂતેષ્વાત્માનમાત્મન્યનુગતમખિલં ભૂતજાતં પ્રપશ્યે-
ત્પ્રાયઃ પાથસ્તરઙ્ગાન્વયવદથ ચિરં સર્વમાત્મૈવ પશ્યેત્ ।
એકં બ્રહ્માદ્વિતીયં શ્રુતિશિરસિ મતં નેહ નાનાસ્તિ કિં ચિ-
ન્મૃત્યોરાપ્નોતિ મૃત્યું સ ઇહ જગદિદં યસ્તુ નાનેવ પશ્યેત્ ॥ ૬૦॥

પ્રાક્પશ્ચાદસ્તિ કુમ્ભાદ્ગગનમિદમિતિ પ્રત્યયે સત્યપીદં
કુમ્ભોત્પત્તાવુદેતિ પ્રલયમુપગતે નશ્યતીત્યન્યદેશમ્ ।
નીતે કુમ્ભેન સાકં વ્રજતિ ભજતિ વા તત્પ્રમાણાનુકારા-
વિત્થં મિથ્યાપ્રતીતિઃ સ્ફુરતિ તનુભૃતાં વિશ્વતસ્તદ્વદાત્મા ॥ ૬૧॥

યાવાન્પિણ્ડો ગુડસ્ય સ્ફુરતિ મધુરિમૈવાસ્તિ સર્વોઽપિ તાવા-
ન્યાવાન્કર્પૂરપિણ્ડઃ પરિણમતિ સદામોદ એવાત્ર તાવાન્ ।
વિશ્વં યાવદ્વિભાતિ દ્રુમનગનગરારામચૈત્યાભિરામં
તાવચ્ચૈતન્યમેકં પ્રવિકસતિ યતોઽન્તે તદાત્માવશેષમ્ ॥ ૬૨॥

વાદ્યાન્નાદાનુભૂતિર્યદપિ તદપિ સા નૂનમાઘાતગમ્યા
વાદ્યાઘાતધ્વનીનાં ન પૃથગનુભવઃ કિં તુ તત્સાહચર્યાત્ ।
માયોપાદાનમેતત્સહચરિતમિવ બ્રહ્મણાભાતિ તદ્વ-
ત્તસ્મિન્પ્રત્યક્પ્રતીતે ન કિમપિ વિષયીભાવમાપ્નોતિ યસ્માત્ ॥ ૬૩॥

દૃષ્ટઃ સાક્ષાદિદાનીમિહ ખલુ જગતામીશ્વરઃ સંવિદાત્મા
વિજ્ઞાતઃ સ્થાણુરેકો ગગનવદભિતઃ સર્વભૂતાન્તરાત્મા ।
દૃષ્ટે બ્રહ્માતિરિક્તં સકલમિદમસદ્રૂપમાભાસમાત્રં
શુદ્ધં બ્રહ્માહમસ્મીત્યવિરતમધુનાત્રૈવ તિષ્ઠેદનીહઃ ॥ ૬૪॥

ઇન્દ્રેન્દ્રાણ્યોઃ પ્રકામં સુરતસુખજુષોઃ સ્યાદ્રતાન્તઃ સુષુપ્તિ-
સ્તસ્યામાનન્દસાન્દ્રં પદમતિગહનં યત્સ આનન્દકોશઃ ।

તસ્મિન્નો વેદ કિઞ્ચિન્નિરતિશયસુખાભ્યન્તરે લીયમાનો
દુઃખી સ્યાદ્બોધિતઃ સન્નિતિ કુશલમતિર્બોધયેન્નૈવ સુપ્તમ્ ॥ ૬૫॥

સર્વે નન્દન્તિ જીવા અધિગતયશસા ગૃહ્ણતા ચક્ષુરાદી-
નન્તઃ સર્વોપકર્ત્રા બહિરપિ ચ સુષુપ્તૌ યથા તુલ્યસંસ્થાઃ ।
એતેષાં કિલ્બિષસ્પૃગ્જઠરભૃતિકૃતે યો બહિર્વૃત્તિરાસ્તે
ત્વક્ચક્ષુઃશ્રોત્રનાસારસનવશમિતો યાતિ શોકં ચ મોહમ્ ॥ ૬૬॥

જાગ્રત્યામન્તરાત્મા વિષયસુખકૃતેઽનેકયત્નાન્વિધાસ્ય-
ઞ્શ્રામ્યત્સર્વેન્દ્રિયૌઘોઽધિગતમપિ સુખં વિસ્મરન્યાતિ નિદ્રામ્ ।
વિશ્રામાય સ્વરૂપે ત્વતિતરસુલભં તેન ચાતીન્દ્રિયં હિ
સુખં સર્વોત્તમં સ્યાત્ પરિણતિવિરસાદિન્દ્રિયોત્થાત્સુખાચ્ચ ॥ ૬૭॥ (સૌખ્યં)

પક્ષાવભ્યસ્ય પક્ષી જનયતિ મરુતં તેન યાત્યુચ્ચદેશં
લબ્ધ્વા વાયું મહાન્તં શ્રમમપનયતિ સ્વીયપક્ષૌ પ્રસાર્ય ।
દુઃસંકલ્પૈર્વિકલ્પૈર્વિષયમનુ કદર્થીકૃતં ચિત્તમેત-
ત્ખિન્નં વિશ્રામહેતોઃ સ્વપિતિ ચિરમહો હસ્તપાદાન્પ્રસાર્ય ॥ ૬૮॥

આશ્લિષ્યાત્માનમાત્મા ન કિમપિ સહસૈવાન્તરં વેદ બાહ્યં
યદ્વત્કામી વિદેશાત્સદનમુપગતો ગાઢમાશ્લિષ્ય કાન્તામ્ ।
યાત્યસ્તં તત્ર લોકવ્યવહૃતિરખિલા પુણ્યપાપાનુબન્ધઃ
શોકો મોહો ભયં વા સમવિષમમિદં ન સ્મરત્યેવ કિંચિત્ ॥ ૬૯॥

અલ્પાનલ્પપ્રપઞ્ચપ્રલય ઉપરતિશ્ચેન્દ્રિયાણાં સુખાપ્તિ-
ર્જીવન્મુક્તૌ સુષુપ્તૌ ત્રિતયમપિ સમં કિં તુ તત્રાસ્તિ ભેદઃ ।
પ્રાક્સંસ્કારાત્પ્રસુપ્તઃ પુનરપિ ચ પરાવૃત્તિમેતિ પ્રબુદ્ધો
નશ્યત્સંસ્કારજાતો ન સ કિલ પુનરાવર્તતે યશ્ચ મુક્તઃ ॥ ૭૦॥

આનન્દાન્યશ્ચ સર્વાનનુભવતિ નૃપઃ સર્વસમ્પત્સમૃદ્ધ
સ્તસ્યાનન્દઃ સ એકઃ સ ખલુ શતગુણઃ સન્પ્રદિષ્ટઃ પિતૃણામ્ ।
આદેવબ્રહ્મલોકં શતશતગુણિતાસ્તે યદન્તર્ગતાઃ સ્યુ-
ર્બ્રહ્માનન્દઃ સ એકોઽસ્ત્યથ વિષયસુખાન્યસ્ય માત્રા ભવન્તિ ॥ ૭૧॥

યત્રાનન્દાશ્ચ મોદાઃ પ્રમુદ ઇતિ મુદશ્ચાસતે સર્વ એતે
યત્રાપ્તાઃ સર્વકામાઃ સ્યુરખિલવિરમાત્કેવલીભાવ આસ્તે ।
માં તત્રાનન્દસાન્દ્રે કૃધિ ચિરમમૃતં સોમપીયૂષપૂર્ણાં
ધારામિન્દ્રાય દેહીત્યપિ નિગમગિરો ભ્રૂયુગાન્તર્ગતાય ॥ ૭૨॥

આત્માऽકમ્પઃ સુખાત્મા સ્ફુરતિ તદપરા ત્વન્યથૈવ સ્ફુરન્તી
સ્થૈર્યં વા ચઞ્ચલત્વં મનસિ પરિણતિં યાતિ તત્રત્યમસ્મિન્ ।
ચાઞ્ચલ્યં દુઃખહેતુર્મનસ ઇદમહો યાવદિષ્ટાર્થલબ્ધિ-
સ્તસ્યાં યાવત્સ્થિરત્વં મનસિ વિષયજં સ્યાત્સુખં તાવદેવ ॥ ૭૩॥

યદ્વત્સૌખ્યં રતાન્તે નિમિષમિહ મનસ્યેકતાને રસે સ્યા-
ત્સ્થૈર્યં યાવત્સુષુપ્તૌ સુખમનતિશયં તાવદેવાથ મુક્તૌ ।
નિત્યાનન્દઃ પ્રશાન્તે હૃદિ તદિહ સુખસ્થૈર્યયોઃ સાહચર્યં
નિત્યાનન્દસ્ય માત્રા વિષયસુખમિદં યુજ્યતે તેન વક્તુમ્ ॥ ૭૪॥

શ્રાન્તં સ્વાન્તં સ બાહ્યવ્યવહૃતિભિરિદં તાઃ સમાકૃષ્ય સર્વા-
સ્તત્તત્સંસ્કારયુક્તં હ્યુપરમતિ પરાવૃત્તમિચ્છન્નિદાનમ્ ।
સ્વાપ્નાન્સંસ્કારજાતપ્રજનિતવિષયાન્સ્વાપ્નદેહેऽનુભૂતા-
ન્પ્રોજ્ઝ્યાન્તઃ પ્રત્યગાત્મપ્રવણમિદમગાદ્ભૂરિ વિશ્રામમસ્મિન્ ॥ ૭૫॥

સ્વપ્ને ભોગઃ સુખાદેર્ભવતિ નનુ કુતઃ સાધને મૂર્છમાને
સ્વાપ્નં દેહાન્તરં તદ્વ્યવહૃતિકુશલં નવ્યમુત્પદ્યતે ચેત્ ।
તત્સામગ્ર્યા અભાવાત્કુત ઇદમુદિતં તદ્ધિ સાંકલ્પિકં ચે-
ત્તત્કિં સ્વાપ્ને રતાન્તે વપુષિ નિપતિતે દૃશ્યતે શુક્રમોક્ષઃ ॥ ૭૬॥

ભીત્યા રોદિત્યનેન પ્રવદતિ હસતિ શ્લાઘતે નૂનમસ્મા-
ત્સ્વપ્નેऽપ્યઙ્ગેऽનુબન્ધં ત્યજતિ ન સહસા મૂર્છિતેऽપ્યન્તરાત્મા ।
પૂર્વં યે યેऽનુભૂતાસ્તનુયુવતિહયવ્યાઘ્રદેશાદયોऽર્થા-
સ્તત્સંસ્કારસ્વરૂપાન્સૃજતિ પુનરમૂઞ્શ્રિત્ય સંસ્કારદેહમ્ ॥ ૭૭॥

સંધૌ જાગ્રત્સુષુપ્ત્યોરનુભવવિદિતા સ્વાપ્ન્યવસ્થા દ્વિતીયા
તત્રાત્મજ્યોતિરાસ્તે પુરુષ ઇહ સમાકૃષ્ય સર્વેન્દ્રિયાણિ ।
સંવેશ્ય સ્થૂલદેહં સમુચિતશયને સ્વીયભાસાન્તરાત્મા
પશ્યન્સંસ્કારરૂપાનભિમતવિષયાન્યાતિ કુત્રાપિ તદ્વત્ ॥ ૭૮॥

રક્ષન્પ્રાણૈઃ કુલાયં નિજશયનગતં શ્વાસમાત્રાવશેષૈ-
ર્મા ભૂત્તત્પ્રેતકલ્પાકૃતિકમિતિ પુનઃ સારમેયાદિભક્ષ્યમ્ ।
સ્વપ્ને સ્વીયપ્રભાવાત્સૃજતિ હયરથાન્નિમ્નગાઃ પલ્વલાનિ
ક્રીડાસ્થાનાન્યનેકાન્યપિ સુહૃદબલાપુત્રમિત્રાનુકારાન્ ॥ ૭૯॥

માતઙ્ગવ્યાઘ્રદસ્યુદ્વિષદુરગકપીન્કુત્રચિત્પ્રેયસીભિઃ

ક્રીડન્નાસ્તે હસન્વા વિહરતિ કુહચિન્મૃષ્ટમશ્નાતિ ચાન્નમ્ ।
મ્લેચ્છત્વં પ્રાપ્તવાનસ્મ્યહમિતિ કુહચિચ્છઙ્કિતઃ સ્વીયલોકા-
દાસ્તે વ્યાઘ્રાદિભીત્યા પ્રચલતિ કુહચિદ્રોદિતિ ગ્રસ્યમાનઃ ॥ ૮૦॥

યો યો દૃગ્ગોચરોઽર્થો ભવતિ સ સ તદા તદ્ગતાત્મસ્વરૂપા-
વિજ્ઞાનોત્પદ્યમાનઃ સ્ફુરતિ નનુ યથા શુક્તિકાઽજ્ઞાનહેતુઃ ।
રૌપ્યાભાસો મૃષૈવ સ્ફુરતિ ચ કિરણજ્ઞાનતોઽમ્ભો ભુજઙ્ગો
રજ્જ્વજ્ઞાનાન્નિમેષં સુખભયકૃદતો દૃષ્ટિસૃષ્ટં કિલેદમ્ ॥ ૮૧॥

માયાધ્યાસાશ્રયેણ પ્રવિતતમખિલં યન્મયા તેન મત્સ્થા-
ન્યેતાન્યેતેષુ નાહં યદપિ હિ રજતં ભાતિ શુક્તૌ ન રૌપ્યે ।
શુક્ત્યંશસ્તેન ભૂતાન્યપિ મયિ ન વસન્તીતિ વિષ્વગ્વિનેતા
પ્રાહાસ્માદ્દૃશ્યજાતં સકલમપિ મૃષૈવેન્દ્રજાલોપમેયમ્ ॥ ૮૨॥

હેતુઃ કર્મૈવ લોકે સુખતદિતરયોરેવમજ્ઞોઽવિદિત્વા
મિત્રં વા શત્રુરિત્થં વ્યવહરતિ મૃષા યાજ્ઞવલ્ક્યાર્તભાગૌ ।
યત્કર્મૈવોચતુઃ પ્રાગ્જનકનૃપગૃહે ચક્રતુસ્તત્પ્રશંસાં
વંશોત્તંસો યદૂનામિતિ વદતિ ન કોઽપ્યત્ર તિષ્ઠત્યકર્મા ॥ ૮૩॥

વૃક્ષચ્છેદે કુઠારઃ પ્રભવતિ યદપિ પ્રાણિનોદ્યસ્તથાપિ
પ્રાયોઽન્નં તૃપ્તિહેતુસ્તદપિ નિગદિતં કારણં ભોક્તૃયત્નઃ ।
પ્રાચીનં કર્મ તદ્વદ્વિષમસમફલપ્રાપ્તિહેતુસ્તથાપિ
સ્વાતન્ત્ર્યં નશ્વરેઽસ્મિન્ન હિ ખલુ ઘટતે પ્રેરકોઽસ્યાન્તરાત્મા ॥ ૮૪॥

સ્મૃત્યા લોકેષુ વર્ણાશ્રમવિહિતમદો નિત્યકામ્યાદિ કર્મ
સર્વં બ્રહ્માર્પણં સ્યાદિતિ નિગમગિરઃ સંગિરન્તેઽતિરમ્યમ્ ।
યન્નાસાનેત્રજિહ્વાકરચરણશિરઃશ્રોત્રસંતર્પણેન
તુષ્યેદઙ્ગીવ સાક્ષાત્તરુરિવ સકલો મૂલસંતર્પણેન ॥ ૮૫॥

યઃ પ્રૈત્યાત્માનભિજ્ઞઃ શ્રુતિવિદપિ તથાકર્મકૃત્કર્મણોઽસ્ય
નાશઃ સ્યાદલ્પભોગાત્પુનરવતરણે દુઃખભોગો મહીયાન્ ।
આત્માભિજ્ઞસ્ય લિપ્સોરપિ ભવતિ મહાઞ્શાશ્વતઃ સિદ્ધિભોગો
હ્યાત્મા તસ્માદુપાસ્યઃ ખલુ તદધિગમે સર્વસૌખ્યાન્યલિપ્સોઃ ॥ ૮૬॥

સૂર્યાદ્યૈરર્થભાનં ન હિ ભવતિ પુનઃ કેવલૈર્નાત્ર ચિત્રં
સૂર્યાત્સૂર્યપ્રતીતિર્ન ભવતિ સહસા નાપિ ચન્દ્રસ્ય ચન્દ્રાત્ ।
અગ્નેરગ્નેશ્ચ કિં તુ સ્ફુરતિ રવિમુખં ચક્ષુષશ્ચિત્પ્રયુક્તા-

દાત્મજ્યોતિસ્તતોઽયં પુરુષ ઇહ મહો દેવતાનાં ચ ચિત્રમ્ ॥ ૮૭॥

પ્રાણેનામ્ભાંસિ ભૂયઃ પિબતિ પુનરસાવન્નમશ્નાતિ તત્ર
તત્પાકં જાઠરોઽગ્નિસ્તદુપહિતબલો દ્રાક્છનૈર્વા કરોતિ ।
વ્યાનઃ સર્વાઙ્ગનાડીષ્વથ નયતિ રસં પ્રાણસંતર્પણાર્થં
નિઃસારં પૂતિગન્ધં ત્યજતિ બહિરયં દેહતોઽપાનસંજ્ઞઃ ॥ ૮૮॥

વ્યાપારં દેહસંસ્થઃ પ્રતિવપુરખિલં પઞ્ચવૃત્ત્યાત્મકોઽસૌ
પ્રાણઃ સર્વેન્દ્રિયાણામધિપતિરનિશં સત્તયા નિર્વિવાદમ્ ।
યસ્યેત્થં ચિદ્ઘનસ્ય સ્ફુટમિહ કુરુતે સોઽસ્મિ સર્વસ્ય સાક્ષી
પ્રાણસ્ય પ્રાણ એષોઽપ્યખિલતનુભૃતાં ચક્ષુષશ્ચક્ષુરેષઃ ॥ ૮૯॥

યં ભાન્તં ચિદ્ઘનૈકં ક્ષિતિજલપવનાદિત્યચન્દ્રાદયો યે
ભાસા તસ્યૈવ ચાનુ પ્રવિરલગતયો ભાન્તિ તસ્મિન્વસન્તિ ।
વિદ્યુત્પુઞ્જોઽગ્નિસંઘોઽપ્યુડુગણવિતતિર્ભાસયેત્કિં પરેશં
જ્યોતિઃ શાન્તં હ્યનન્તં કવિમજમમરં શાશ્વતં જન્મશૂન્યમ્ ॥ ૯૦॥

તદ્બ્રહ્મૈવાહમસ્મીત્યનુભવ ઉદિતો યસ્ય કસ્યાપિ ચેદ્વૈ
પુંસઃ શ્રીસદ્ગુરૂણામતુલિતકરુણાપૂર્ણપીયૂષદૃષ્ટ્યા ।
જીવન્મુક્તઃ સ એવ ભ્રમવિધુરમના નિર્ગતેઽનાદ્યુપાધૌ
નિત્યાનન્દૈકધામ પ્રવિશતિ પરમં નષ્ટસંદેહવૃત્તિઃ ॥ ૯૧॥

નો દેહો નેન્દ્રિયાણિ ક્ષરમતિચપલં નો મનો નૈવ બુદ્ધિઃ
પ્રાણો નૈવાહમસ્મીત્યખિલજડમિદં વસ્તુજાતં કથં સ્યામ્ ।
નાહંકારો ન દારા ગૃહસુતસુજનક્ષેત્રવિત્તાદિ દૂરં
સાક્ષી ચિત્પ્રત્યગાત્મા નિખિલજગદધિષ્ઠાનભૂતઃ શિવોઽહમ્ ॥ ૯૨॥

દૃશ્યં યદ્રૂપમેતદ્ભવતિ ચ વિશદં નીલપીતાદ્યનેકં
સર્વસ્યૈતસ્ય દૃગ્વૈ સ્ફુરદનુભવતો લોચનં ચૈકરૂપમ્ ।
તદ્દૃશ્યં માનસં દૃક્પરિણતવિષયાકારધીવૃત્તયોઽપિ
દૃશ્યા દૃગ્રૂપ એવ પ્રભુરિહ સ તથા દૃશ્યતે નૈવ સાક્ષી ॥ ૯૩॥

રજ્જ્વજ્ઞાનાદ્ભુજઙ્ગસ્તદુપરિ સહસા ભાતિ મન્દાન્ધકારે
સ્વાત્માજ્ઞાનાત્તથાસૌ ભૃશમસુખમભૂદાત્મનો જીવભાવઃ ।
આપ્તોક્ત્યાહિભ્રમાન્તે સ ચ ખલુ વિદિતા રજ્જુરેકા તથાહં
કૂટસ્થો નૈવ જીવો નિજગુરુવચસા સાક્ષિભૂતઃ શિવોઽહમ્ ॥ ૯૪॥

કિં જ્યોતિસ્તે વદસ્વાહનિ રવિરિહ મે ચન્દ્રદીપાદિ રાત્રૌ
સ્યાદેવં ભાનુદીપાદિકપરિકલને કિં તવ જ્યોતિરસ્તિ ।
ચક્ષુસ્તન્મીલને કિં ભવતિ ચ સુતરાં ધીર્ધિયઃ કિં પ્રકાશે
તત્રૈવાહં તતસ્ત્વં તદસિ પરમકં જ્યોતિરસ્મિ પ્રભોઽહમ્ ॥ ૯૫॥

કંચિત્કાલં સ્થિતઃ કૌ પુનરિહ ભજતે નૈવ દેહાદિસંઘં
યાવત્પ્રારબ્ધભોગં કથમપિ સ સુખં ચેષ્ટતેઽસઙ્ગબુદ્ધ્યા ।
નિર્દ્વન્દ્વો નિત્યશુદ્ધો વિગલિતમમતાહંકૃતિર્નિત્યતૃપ્તો
બ્રહ્માનન્દસ્વરૂપઃ સ્થિરમતિરચલો નિર્ગતાશેષમોહઃ ॥ ૯૬॥

જીવાત્મબ્રહ્મભેદં દલયતિ સહસા યત્પ્રકાશૈકરૂપં
વિજ્ઞાનં તચ્ચ બુદ્ધૌ સમુદિતમતુલં યસ્ય પુંસઃ પવિત્રમ્ ।
માયા તેનૈવ તસ્ય ક્ષયમુપગમિતા સંસૃતેઃ કારણં યા
નષ્ટા સા કાર્યકર્ત્રી પુનરપિ ભવિતા નૈવ વિજ્ઞાનમાત્રાત્ ॥ ૯૭॥

વિશ્વં નેતિ પ્રમાણાદ્વિગલિતજગદાકારભાનસ્ત્યજેદ્વૈ
પીત્વા યદ્વત્ફલામ્ભસ્ત્યજતિ ચ સુતરાં તત્ફલં સૌરભાઢ્યમ્ ।
સમ્યક્સચ્ચિદ્ઘનૈકામૃતસુખકબલાસ્વાદપૂર્ણો હૃદાસૌ
જ્ઞાત્વા નિઃસારમેવં જગદખિલમિદં સ્વપ્રભઃ શાન્તચિત્તઃ ॥ ૯૮॥

ક્ષીયન્તે ચાસ્ય કર્માણ્યપિ ખલુ હૃદયગ્રન્થિરુદ્ભિદ્યતે વૈ
છિદ્યન્તે સંશયા યે જનિમૃતિફલદા દૃષ્ટમાત્રે પરેશે ।
તસ્મિંશ્ચિન્માત્રરૂપે ગુણમલરહિતે તત્ત્વમસ્યાદિલક્ષ્યે
કૂટસ્થે પ્રત્યગાત્મન્યખિલવિધિમનોઽગોચરે બ્રહ્મણીશે ॥ ૯૯॥

આદૌ મધ્યે તથાન્તે જનિમૃતિફલદં કર્મમૂલં વિશાલં
જ્ઞાત્વા સંસારવૃક્ષં ભ્રમમદમુદિતાશોકતાનેકપત્રમ્ ।
કામક્રોધાદિશાખં સુતપશુવનિતાકન્યકાપક્ષિસંઘં
છિત્વાસઙ્ગાસિનૈનં પટુમતિરભિતશ્ચિન્તયેદ્વાસુદેવમ્ ॥ ૧૦૦॥

જાતં મય્યેવ સર્વં પુનરપિ મયિ તત્સંસ્થિતં ચૈવ વિશ્વં
સર્વં મય્યેવ યાતિ પ્રવિલયમિતિ તદ્બ્રહ્મ ચૈવાહમસ્મિ ।
યસ્ય સ્મૃત્યા ચ યજ્ઞાદ્યખિલશુભવિધૌ સુપ્રયાતીહ કાર્યં
ન્યૂનં સમ્પૂર્ણતાં વૈ તમહમતિમુદૈવાચ્યુતં સંનતોઽસ્મિ ॥ ૧૦૧॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય શ્રીગોવિન્દભગવ-
ત્પૂજ્યપાદશિષ્યસ્ય શ્રીમચ્છંકરભગવતઃ કૃતૌ

શતશ્લોકી સમાપ્તા ॥

Encoded by Subhash Prajapati, Sunder Hattangadi
Proofread by Subhash Prajapati, Sunder Hattangadi,
Sreenivasa Rao Bhagavatula

*Shata Shloki or Vedanta Kesari*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*